AD EDUXIAN JOURNAL
A Quarterly Multidisciplinary Blind Peer Reviewed & Refereed Online International Journal
Google Scholar Indexing PIF: 1.048(I2OR), 3.125 (IIFS) & 3.8(SJIF)
Vol (3), Issue (3), July-September 2026 ISSN: 3048-7951

# भासस्य अन्वेषणं : तस्य महत्वस्य अवलोकनं च

स्वाती रेखा साहु[1]

DOI: http://doi.org/10.5281/zenodo.23307236
Review: 03/09/2026 Acceptance: 09/09/2026 Publication: 13/10/2026

**शोधसारः** महाकवि भासः प्राचीनभारतस्य प्रसिद्धः संस्कृतनाट्यकारः कविः च आसीत्। महाकविः भासः संस्कृतसाहित्ये तत्रापि विशेषतः नाट्यसाहित्याकाशस्य जाज्वल्यमानो नक्षत्रमासीत्। आधुनिककालेऽपि तस्य नाट्यकलां कविताशैलीञ्च दृष्ट्वा काव्यरसिका मोदन्तेतमाम्। महाकविः भासः संस्कृतसाहित्ये यदा नाटकं लिखितुं प्रारब्धवान्, तदा नासीत् संस्कृतसाहित्ये कस्यापि तादृशं नाटकं यदवलोक्य निर्दिष्टं नाट्यकलां गृहीत्वा नाटकं रचितुं शक्नुयात्। भासस्य कृतिषु या नाट्यकला सा भासस्य स्वात्मभूता। जन्मकालोऽयं संस्कृतनाटकस्य यदा भास एवं एतादृशः प्रथमो नाट्यकारः यस्य कृतेरनुकरणेन संस्कृतसाहित्ये मनोहराति-मनोहरतमं नाटकं साम्प्रतमपि दृश्यते। भासस्य परवर्तिनो ये ये नाटककाराः समभूवन् ते सर्वेऽपि भासस्य ऋणभाजः सन्ति।

**मुख्यशब्दाः-** भासः, भासस्य कृतयः।

**उपोद्घातः** संस्कृतसाहित्यस्य धारा अविच्छिन्नरूपेण प्रवहति। यथा- प्रथमं वेदाः, वेदानामनन्तरं ब्राह्मणग्रन्थाः, ब्राह्मणग्रन्थानामनन्तरमारण्यकाः, आरण्यकानामनन्तरमुपनिषद् - ग्रन्थाः, उपनिषदामुपरान्तं रामायण-महाभारतपुराणानि, पुराणानामनन्तरं काव्य-नाटक-गद्य-पद्य-कथाख्यायिका-स्मृति-ग्रन्थानां निर्माणोऽभवत्। संस्कृतसाहित्ये गद्यपद्ययोरनन्तरं रूपकस्य प्रमुखं स्थानमस्ति। अवस्थाविशेषस्य अनुकरणं कृत्वा आनन्दं मनोरञ्जनञ्च 'नाटकम्' इति कथ्यते । गद्यकाव्यानि, पद्यकाव्यानि च श्रव्यकाव्येष्वन्तर्भवन्ति, यथा- कथाख्यायिका आदयः। रूपकं तु दृश्यकाव्येष्वन्तर्भवति, श्रव्यकाव्यशिक्षणे श्रवणेन्द्रियमेव कार्यं करोति। दृश्यकाव्यशिक्षणसमये श्रवणेन्द्रियं चक्षुरिन्द्रियम् उभेऽपि कार्यं कुरूतः। अतः श्रव्यकाव्यापेक्षया दृश्यकाव्यस्यैव अत्यधिकं प्रामुख्यम् अस्ति। नाटकस्य संस्कृते विशिष्टं स्थानं वर्तते। नाटकं संस्कृतसाहित्यस्य गौरवपूर्णविधास्ति। नाट्यसाहित्येनैवाद्य संस्कृतसाहित्यस्य कीर्तिकौमुदी जगति सर्वत्र व्याप्ता दरीदृश्यते। काव्येषु नाटकं श्रेष्ठं मन्यते। आचार्यभरतस्य मतानुसारं नाटके त्रैलोक्यस्य भावनानाम् अनुकीर्तिनं प्राप्यते-

**त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ।**[2]

सार्वजनिकमनोरञ्जनस्य साधनं भवति नाटकम् । नाटकस्य निर्माणं सर्वजनहिताय सर्वजनसुखाय भवति । यतो हि देवसमाजहितचिन्तनेच्छाया ब्रह्मणा नाटकस्य सृष्टिः कृता -

**"क्रीडनीयकमिच्छामि दृश्यं श्रव्यं च यद् भवेत् ।**

[1]पदवी - शोधच्छात्रा (शिक्षाशास्त्रविभागः), केन्द्रीय संस्कृतविश्वविद्यालयः, श्री सदाशिवपरिसरः(पुरी) ।

**तस्मात् सृजापर वेदं पञ्चमं सार्ववर्णिकम्"।।**[3]

नाटकस्य महत्त्वविषये महाकविकालिदासेन मालविकाग्निमित्रे उच्यते -

**देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं ।**
**इन्द्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते ।**
**नाट्यं भिन्नरूचेर्जनस्य बहुधाऽप्येकं समाराधनम् ।।**[4]

सम्प्रति उपलभ्यमानानां रूपकाणां मध्ये नाटककारस्य भासस्य लिखितं रूपकं प्राचीनतमम् अस्ति - अधिकांशस्य विद्वानानाम् एषः एव विश्वासः अस्ति । अन्येषु शब्देषु भासः संस्कृतनाट्यसाहित्यस्य मूलनाट्यकारः इति वक्तुं शक्नुमः ।

**भासः**

संस्कृतसाहित्ये कवेः भासस्य प्रशस्तिप्रकटने कालिदासादि कवीनां प्रशंसापूर्वकवचनान्येव साधु । अलमतिप्रसङ्गेन कालिदासः स्वस्य मालविकाग्निमित्रनाटकस्य प्रस्तावनायां कविभासमधिकृत्य एवं वर्णयति -

**प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य ।**
**वर्त्तमानकवेः कालिदासस्य क्रियायां कथं परिषदोऽस्याः बहुमानः ।।**

अत्र वण्यमाणानां भाससौमिल्लकविपुत्रादीनां त्रयाणां कवीनां मध्ये कविभासस्यैव प्रथमं स्थानं दत्तं कविश्रेष्ठैः कालिदासैः। अनेन ज्ञायते यत् कालिदासस्य समये भासस्य महती प्रसिद्धिरासीदिति। अस्य कृतयः सर्वसाधारणजनेषु विख्याता आसन्। अत एव कालिदासस्य कमनीयनाटकमपि जनाः समादरेण नावलोकयन्ति स्म। भासस्य काव्यगतवैशिष्ट्यं विशदयन् **वाणभट्टो** निर्दिशति -

**"सूत्रधारकृतारम्भैर्नाटकैः बहुभूमिकैः।**
**सपताकैर्यशो लेभे भासो देवकुलैरिव।।"**

अस्यायमाशयः सर्वाण्यपि भासरूपकाणि सूत्रधारप्रवेशेन सह प्रारभ्यन्ते। यथा **प्रतिमानाटके 'नाद्यन्ते ततः प्रविशति सूत्रधारः'** इति। बहुभूमिकैरिति बहुपात्रैस्तस्य रूपकेषु पात्रबाहुल्यं भवति। सपताकैः पताका अवान्तरकथा मुख्यकथया सह दूरसञ्चारितम् अर्थप्रकृतिष्वन्यतमा च।

भासस्य भाषा नितान्तमवसरला जनभाषानुगा। तस्य शैल्यापि सा च। तस्य वर्णनमपि यथार्थमेव काव्यसौरभव्याजेन न तत्र अवात्कृत्रिमता। तस्य पात्राणि च व्यक्तित्वप्रधानानि न च सन्देशप्रवाहकानि, तस्य रूपकाणि रङ्गोचितानि नितान्तमभिनेयानि। तदुपस्थापितं घटनाचक्रमपि सजीवं मौलिकं प्रभावोत्पादकञ्च। तस्य सामान्यवर्णनमपि रोचकं हृद्यञ्च। यस्य रूपकेषु प्रायो वीररसस्य प्राधान्यम्। घटनान्विति

---

3 - नाट्यशास्त्र-1/1

4 मालविकाग्निमित्रम् - 1/4

कार्यस्थानसमयानामन्वितिः घटनायाः सार्थक्यं, चरित्रचित्रणे उक्तिप्राधान्यं, स्वाभाविकतामनुज्झित्वैव घटनाप्रकाशचेत्याद्या रसनाटकविशेषताः। भासो वैदर्भीरीतेः कविः। तद्रचनासु माधुर्योजः प्रसादानाम् अवस्थानं समुचितः प्रयोगः। मृच्छकटिकमपि भासस्य चारूदत्तस्यै वोत्तरभाग एव। यदि तस्य कर्ता शूद्रको भवेत्तदा कथं स एवात्मानं-लब्ध्वा चायुः शताब्दं दशदिनहतं शूद्रकोऽग्नि प्रविष्टः इति ब्रूयात्। अपरञ्च **"कलभदशनरूद्रो लाङ्गलाकारनासः करिवरकरबाहु - र्नोलजी मूतवर्णः"** इति मध्यमव्यायोगस्य पद्यं द्विरदेन्द्रगतिञ्चकोरनेत्र परिपूर्णेन्दुमुखः सुविग्रहश्च इति मृच्छकटिकगतं पद्यञ्च पठतो जनस्य मानसे किं समान एव प्रभावो नैवोत्पद्यते? नितान्तमेव। तेन यथार्थत एव भासो हासः सर्वेषामैवोत्तरवर्तिनां कवीनामुपजीव्यः।

**भासस्य कृतयः**

भासस्य रूपकाणि- प्रतिज्ञायौगन्धरायण-स्वप्नवासवदत्ताऽविमारकाणि त्रीणि बृहत्कथाऽऽधाराणि। प्रतिमानाटकभिषेकश्चेति द्वे रामायणमूले। मध्यमव्यायोग-पञ्चरात्र-दूतघटोत्कच-कर्णभारोरूभङ्गयज्ञफल-दूतवाक्यानि सप्त महाभारताश्रयाणि, बालचरितं भागवताश्रयम् दरिद्रचारुदत्तं च कल्पितकथामिति विवेकः। त्रयोदशनाटकेषु उल्लिखिताः मुख्यविषयाः अधः दत्ताः सन्ति।

**स्वप्नवासवदत्तम्** -

भासस्य सर्वेषु नाटकेषु स्वप्नवासवदत्तं तादृशं नाटकं विद्यते, यत्र भासस्य नाट्यकुशलतायाः निदर्शनं लभ्यते। नाटकेऽस्मिन् नाटकीयघटनानाम् ईदृशं मनोहरस्वरूपं प्राप्यते, यत् अस्वाभाविकतायाः दर्शनमेव कुत्रापि न भवति। स्वप्नवासवदत्तं संस्कृतसाहित्यस्य जाज्ज्वल्यमानं रत्नं विद्यते इति नात्र संशयः। नाटकमिदं यथैव साहित्यिकदृष्ट्या महत्वास्पदं, तथैव व्यावहारिकदृष्ट्यापि श्रेष्ठस्थानं लभते। नाटकेऽस्मिन् भासस्य भाषा विचित्रास्ति। अस्मिन् नाटके अङ्कानां संख्या षट्। उदयनवासवदत्तयोः एषा प्रेमकथा-। तथापि अनिवार्यतया तत्र राजनीतेः अपि समावेशः अस्ति। **'स्वप्ने दृष्टा वासवदत्ता यस्मिन् नाटके तत् स्वप्नवासवदत्तम्'** इति नाम्नः अर्थः। अस्मिन् नाटके एकं स्वप्नदृश्यम् अस्ति। तत्र उदयनः उत्स्वप्नायमानःवासवदत्ता जागरितः इति व ,िचित्रः योगः भासेन योजितः। सः प्रेक्षकेभ्यः अतीव अरोचत। अस्य नाटकस्य प्रयोगकाले प्रेक्षकाः अतीव उत्कण्ठया एतं प्रसङ्गं प्रेक्षन्ते।

**प्रतिज्ञायौगन्धारायणम्** -

पञ्चाङ्कात्मकमिदं नाटकम्। नाटकेऽस्मिन् अङ्कचतुष्टयं वर्तते। स्वप्नवासवदत्तनाटकस्य एषः पूर्वतनः कथाभागः। उदयनवासवदत्तयोः विवाहाद् अनन्तर-ं कथाभागः स्वप्नवासवदत्ते अस्ति। तयोः विवाहात् पूर्वतनः कथाभागः अस्मिन् नाटके अस्ति। अत्र उदयन ,तस्य साफल्यार्थं यौगन्धरायणेन कृताः प्रयत्नाः ,वासवदत्तयोः गुप्तं प्रेमं - ततः विवाहः इति एषः कथाभागः अत्र भासेन चित्रितः।

**ऊरूभङ्गम्** -

द्युते पाण्डवाः पराभूताः। द्रौपदी कौरवाणां दासी जाता। तदा दुर्योधनेन सा स्वस्य अङ्के उपवेष्टुं सभामध्ये आहूता। ततः क्रूद्धः भीमसेनः उग्रां प्रतिज्ञां कृतवान् -'दुर्योधनस्य ऊरुभङ्गं करिष्यामि इति'। अस्याः प्रतिज्ञायाः पूर्तिं

भीमसेनः कथं करोतीति कथा अस्मिन् नाटके अस्ति। वीररसपूर्णाः संवादाःदुर्योधनस्य रणे ,गदायुद्धस्य वर्णनं , मृत्युः इति अत्र साधुतया चित्रिताः प्रसङ्गाः। संस्कृते नाटकं सुखान्तिकम् एव भवति। इदं नाटकम् अपवादभूतम्। दुःखान्तम् इदं नाटकम्। नाटकमिदम् एकाङ्कपरिमितम्।

**दूतवाक्यम्-**

व्यायोगः एषः। व्यायोगः नाम एकाङ्कः। अत्र दूतः श्रीकृष्णः। कौरवपाण्डवयोः युद्धं भविता इति यदा स्थितिः प्राप्ता तदा श्रीकृष्णः युद्धपरिहाराय ,दूतरूपेण दुर्योधनं प्रति गच्छति। सः कथाभागः अस्मिन् व्यायोगे अस्ति। दुर्योधनस्य दुर्जनतातथा श्रीकृष्णस्य सुजनता इति एतयोः वि ,रोधः भासेन उत्तमरीत्या चित्रितः।

**पञ्चरात्रम्** -

अङ्कत्रयात्मकस्यास्य नाटकस्य विराट्पर्वणः कथावस्तुनः आधारेण कल्पनापूर्णनिर्माणं भवति। द्रोणाचार्यस्य कृते दक्षिणात्वेन पाण्डवानाम् अर्धराज्यप्रदानस्य वचनम्, अज्ञातवासस्थितेः पञ्चरात्रयोः पाण्डवानां सन्धानं मिलति चेत् दुर्योधनस्य अर्धराज्यप्रदानम् अस्य नाटकस्य प्रतिपादितविषयः।

**दूतघटोत्कचः** -

अस्मिन् एकाङ्कविशिष्टनाटके अभिमन्युवधेन अर्जुनः शोकाकुलः भवति। सः जयद्रथवधस्य प्रतिज्ञां करोति। तदा श्रीकृष्णः घटोत्कचं दूतरूपेण धृतराष्ट्रं प्रति प्रेषयति। उद्धतः घटोत्कचः तथा उन्मत्तः दुर्योधनः इति एतयोः शाब्दिकः सङ्घर्षः प्रेक्षणीयः अस्ति।

**कर्णभारम्-**

प्रस्तुते उत्सृष्टिङ्काके कर्णस्य दानशूरता विख्याता। ताम् अधिकृत्य अस्य नाटकस्य रचना कृता। इन्द्रः ब्राह्मणरूपेण कर्णं प्रति आगच्छति। तं कवचकुण्डलं प्रार्थयते। एतदभावे स्वस्य अर्जुनात् मृत्युः ध्रुवः इति जानम् अपि कर्णः कवचकुण्डलानां दानं करोति इति अयं कथाभागः अत्रास्ति।

**मध्यमव्यायोगः** -

मध्यमः इत्युक्ते मध्यमः पाण्डवः भीमसेनः। भीमसेनः बकासुरं हन्ति। ब्राह्मणपुत्रं रक्षति च। सः ब्राह्मणपुत्रः अपि ब्राह्मणस्य मध्यमः पुत्रः। एवं मध्यमः मध्यमं रक्षति इति मध्यमव्यायोगः। ततः भीमसेनस्य घटोत्कचेन सह युद्धं भवति। भीमसेनः स्वस्य पिता अस्तीति घटोत्कचः न वेत्ति। सः भीमसेनं पाशैः बद्ध्वा स्वमातरं प्रति नयति। तस्य माता हिडिम्बा भीमसेनं दृष्ट्वा अभिजानाति। सा भीमसेनं मोचयति। विषयः गभीरः नास्ति। घटोत्कचस्य चरित्रम् रूचिरं चित्रितम्।

**प्रतिमानाटकम्** -

सप्ताङ्कात्मकं प्रदीर्घं नाटकम् एतत्। रामस्य वनवासमारभ्य रावणवधं यावत् कथाभागः अत्र स्वीकृतः। रामायणस्य मूलकथा तः क्वचित् परिवर्त्य भासः प्रसङ्गान् रचयति। एकमुदाहरणम् अत्र प्रस्तुयते। यदा दशरथः दिवंगतः , तदा भरतः मातुलगृहे आसीत्। सः अयोध्यां प्रति निवृत्तः। तदा सः प्रतिमागृहं प्रति नीयते। तत्र दिवंगतानां

रघुवंशीयानां प्रतिमाः स्थपिताः सन्ति। तासु सः दशरथस्य प्रतिमां पश्यति अथ जानाति दशरथः दिवंगतः इति। एतादृशी नाट्यमयता भासेन अत्र नैकधा निर्मिता। अतः लोकप्रियमेतत् नाटकम्।

**अभिषेकनाटकम्** -

षडङ्कात्मकम् एतत् नाटकम्। रामकथा अस्य विषयः। रामायणस्थं किष्किन्धाकाण्डंसुन्दराकाण्डं तथा , युद्धकाण्डम् इति काण्डत्रयमाधारीकृत्य अस्य रचना कृता। रामस्य अभिषेकप्रसङ्गेन नाटकं समाप्यते।

**अविमारकम्** -

नाटकेऽस्मिन् षडङ्काः सन्ति। अस्य कथा एवमस्ति। कुन्तिभोजः न कश्चित् नृपः। तस्य कन्या कुरङ्गी। अविमारकः नाम राजपुत्रः उभयोः प्रेमकथा एषा। रामायणं वा महाभारतं वा अस्याः कथायाः आधारः नास्ति। काञ्चन लोककथाम् आदाय भासेन नाटकमिदं विरचितम्।

**चारुदत्तम्**-

अस्मिन् अङ्कचतुष्टयात्मकं नाटकं बृहत्कथाधारिता भवति । मृच्छकटिकस्य कथानकं तथा चारुदत्तस्य कथानकं समानमेव। चारुदत्तः निर्धनः परं सज्जनः ब्राह्मणः। वसन्तसेना धनाढ्या तथा गुणाढ्या गणिका। तयोः प्रणयकथा भासेन अस्मिन् नाटके कुशलतया प्रस्तुता।

**बालचरितम्**-

इदं नाटकं पञ्चाङ्कविशिष्टं पौराणिकं नाटकमस्ति। अस्य उपजीव्यग्रन्थः हरिवंशपुराणमिति मन्यते। अत्र कृष्णजन्मतः आरभ्य कंसवधं यावत् कथाभागः वर्णितः। हरिवंशपुराणस्थां कृष्णकथाम् आधारीकृत्य नाटकमेतत् विरचितम्। एवमेतानि त्रयोदशं भासस्य नाटकानि। सामान्यजनस्य भावनानां चित्रणं भासः उत्तमं करोति। किञ्च तादृशं चित्रणम् अन्येषां कवीनां कृतिषु न लभ्यते। तस्य लेखने अलङ्काराणां प्राचुर्यं नास्ति। क्लिष्टाः समासाः न सन्ति। भावनानाम् आविष्करणे नाटककारस्य अवधानम् अधिकम् अस्तीति दृश्यते। तेन तस्य नाटकानि सुगमानि भवन्तिरूचिराणि भवन्ति ,।

**उपसंहारः**

महाकविः भासः संस्कृतसाहित्ये तत्रापि विशेषतः नाट्यसाहित्याकाशस्य जाज्वल्यमानो नक्षत्रमासीत्। आधुनिककालेऽपि तस्य नाट्यकलां कविताशैलीञ्च दृष्ट्वा काव्यरसिका मोदन्तेतमाम्। महाकविः भासः संस्कृतसाहित्ये यदा नाटकं लिखितुं प्रारब्धवान्, तदा नासीत् संस्कृतसाहित्ये कस्यापि तादृशं नाटकं यदवलोक्य निर्दिष्टं नाट्यकलां गृहीत्वा नाटकं रचितुं शक्नुयात्। भासस्य कृतिषु या नाट्यकला सा भासस्य स्वात्मभूता। जन्मकालोऽयं संस्कृतनाटकस्य यदा भास एवमेतादृशः प्रथमो नाट्यकारः यस्य कृतेरनुकरणेन संस्कृतसाहित्ये मनोहराति-मनोहरतमं नाटकं साम्प्रतमपि दृश्यते। भासस्य परवर्त्तिनो ये ये नाटककाराः समभूवन् ते सर्वेऽपि भासस्य ऋणभाजः सन्ति। महाकविः कालिदासोऽपि अस्य वैशिष्ट्यं मुक्तकण्ठेन स्वीकरोति। संस्कृतसाहित्यस्यामरो गीतकारः **श्रीजयदेवो**ऽपि भासस्य कवितां प्रशंसयन् समलिखत् -

**"भासो हासः कविकुलगुरुः कालिदासो विलासः।**

**केषां नैषा कथय कविताकामिनी कौतुकाय।।"**

इति एवं प्रकारेण संस्कृतसाहित्ये भासस्य महती प्रसिद्धिः दृश्यते। विकसितनाट्यसाहित्यस्य श्रेयः प्राप्तुं भासः एवार्हति नान्यः।

**सन्दर्भ ग्रन्थ सूची:**


**Aiyar T K Ramachandra**, A Short History of Sanskrit Literature, R S Vadhyar & Sons, Palghat, 2018.

**Ayyar A S P, Bhāsa,** The Madras Law Journal Office, Madras, 1942.

**Bhāsa,** Svapnavāsavadatta, National Publications, Calicut, 2005.

**Pusalkar A D, Bhāsa** - A Study, Meher Chand Lachman Das, Lahore, 1940.

**Studies in Bhasa - V.S.SukthaSuthhankar**- Journal of the American Oriental Society, 1920, Vol.40(1920)- Published by American Oriental Society- Comprehensive Review of the plays, regarding the age of the Dramas or the authorship of Bhasa.

**Dr. Indulekha B** - International Journals on Arts, management and humanities - "Bhasa: The eminent poet" Trivendram-10 (kerala) - discussed about the prominent characterstics of Bhasa's plays.

**भासः।**(अनुवादः A. C. Woolner द्वारा)। (१९३०-१९३१)। भासस्य नाटकानि।दिल्ली:, मोतीलाल बनारसीदास प्रकाशक।

**कीथ, ए बी (1924)**। संस्कृतनाटकम्। आक्सफोर्डः आक्सफोर्ड विश्वविद्यालय प्रेस।

**रिचमण्ड्, एफ.पी.(1998).** भासः। द एन्साइक्लोपीडिया आफ् इण्डियन फिलोसोफीज, खण्ड 1 इत्यस्मिन् ग्रन्थे। ५ (पृष्ठं १४७-१५६)। दिल्ली: मोतीलाल बनारसीदास प्रकाशक।